521089

THE

HYMNS OF THE RIG-VEDA

IN THE

SAMHITA AND PADA TEXTS

REPRINTED FROM THE EDITIO PRINCEPS

BY

F. MAX MÜLLER, M.A.

MEMBRE ÉTRANGER DE L'INSTITUT DE FRANCE
ETC.

SECOND EDITION

WITH THE TWO TEXTS ON PARALLEL PAGES

IN TWO VOLUMES

VOL. I

LONDON

TRÜBNER AND CO., 57 AND 59, LUDGATE HILL

STRASBURG: K. I. TRÜBNER

1877

॥ संहितापाठः ॥

॥ ओं ॥

॥ १ ॥ १–९ मधुच्छंदा वैश्वामित्रः ॥ अग्निः ॥ गायत्री ॥

॥१॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं । होतारं
रत्नधातमं ॥१॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स
देवाँ एह वक्षति ॥२॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे।
यशसं वीरवत्तमं ॥३॥ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।
स इद्देवेषु गच्छति ॥४॥ अग्निर्होता कविक्रतुः सत्यश्चित्रश्रव-
स्तमः । देवो देवेभिरा गमत् ॥५॥१॥ यदंग दाशुषे त्वमग्ने
भद्रं करिष्यसि। तवेत्तत्सत्यमंगिरः ॥६॥ उप त्वाग्ने दिवेदिवे दो-
षावस्तर्धिया वयं। नमो भरंत एमसि ॥७॥ राजंतमध्वराणां
गोपामृतस्य दीदिविं। वर्धमानं स्वे दमे ॥८॥ स नः पितेव
सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥९॥२॥

॥२॥ १–९ मधुच्छंदा वैश्वामित्रः॥ १–३ वायुः। ४–६ इंद्रवायू। ७–९ मित्रावरुणौ॥ गायत्री॥

॥२॥ वायवा याहि दर्शतेमे सोमा अरंकृताः । तेषां
पाहि श्रुधी हवं ॥१॥ वाय उक्थेभिर्जरंते त्वामच्छा जरि-
तारः। सुतसोमा अहर्विदः ॥२॥ वायो तव प्रपृंचती धेना
जिगाति दाशुषे । उरूची सोमपीतये ॥३॥ इंद्रवायू इमे
सुता उप प्रयोभिरा गतं । इंदवो वामुशंति हि ॥४॥
वायविंद्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप

॥ पदपाठः ॥

॥ ओं ॥

॥१॥ अग्निं ईळे पुरःऽहितं यज्ञस्य देवं ऋत्विजं होतारं
रत्नऽधातमं ॥१॥ अग्निः पूर्वेभिः ऋषिऽभिः ईड्यः नूतनैः
उत सः देवान् आ इह वक्षति ॥२॥ अग्निना रयिं अश्नवत्
पोषं एव दिवेऽदिवे यशसं वीरवत्ऽतमं ॥३॥ अग्ने यं यज्ञं
अध्वरं विश्वतः परिऽभूः असि सः इत् देवेषु गच्छति ॥४॥
अग्निः होता कविऽक्रतुः सत्यः चित्रश्रवःऽतमः देवः देवेभिः
आ गमत् ॥५॥१॥ यत् अंग दाशुषे त्वं अग्ने भद्रं करिष्यसि
तव इत् तत् सत्यं अंगिरः ॥६॥ उप त्वा अग्ने दिवेऽदिवे
दोषाऽवस्तः धिया वयं नमः भरंतः आ इमसि ॥७॥ राजंतं
अध्वराणां गोपां ऋतस्य दीदिविं वर्धमानं स्वे दमे ॥८॥
सः नः पिताऽइव सूनवे अग्ने सुऽउपायनः भव सचस्व नः
स्वस्तये ॥९॥२॥

॥२॥ वायो आ याहि दर्शत इमे सोमाः अरंऽकृताः तेषां
पाहि श्रुधि हवं ॥१॥ वायो उक्थेभिः जरंते त्वां अच्छ जरि-
तारः सुतऽसोमाः अहःऽविदः ॥२॥ वायो तव प्रऽपृंचती
धेना जिगाति दाशुषे उरूची सोमऽपीतये ॥३॥ इंद्रवायू
इमे सुताः उप प्रयःऽभिः आ गतं इंदवः वां उशंति हि ॥४॥
वायो इंद्रः च चेतथः सुतानां वाजिनीऽवसू॰ तौ आ यातं उप

द्रवत् ॥५॥३॥ वायविंद्रश्च सुन्वत आ यातमुप निष्कृतं । मक्ष्वित्था धिया नरा ॥६॥ मित्रं हुवे पूतदक्षं वरुणं च रिशादसं । धियं घृताचीं साधंता ॥७॥ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहंतमाशाथे ॥८॥ कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसं ॥९॥४॥

॥ ३ ॥ १–१२ मधुच्छंदा वैश्वामित्रः ॥ १–३ अश्विनौ । ४–६ इंद्रः । ७–९ विश्वे देवाः । १०–१२ सरस्वती ॥ गायत्री ॥

॥३॥ अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतं ॥१॥ अश्विना पुरुदंससा नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥२॥ दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातं रुद्रवर्तनी ॥३॥ इंद्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥४॥ इंद्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥५॥ इंद्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥६॥५॥ ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतं ॥७॥ विश्वे देवासो अप्तुरः सुतमा गंत तूर्णयः । उस्रा इव स्वसराणि ॥८॥ विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषंत वह्नयः ॥९॥ पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥१०॥ चोदयित्री सूनृतानां चेतंती सुमतीनां । यज्ञं दधे सरस्वती ॥११॥ महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥१२॥६॥१॥

॥ ४ ॥ १–१० मधुच्छंदा वैश्वामित्रः ॥ इंद्रः ॥ गायत्री ॥

॥४॥ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥१॥ उप नः सवना गहि सोमस्य सोमपाः

द्रवत् ॥५॥३॥ वायो इंद्रः च सुन्वतः आ यातं उप निःऽकृतं मक्षु इत्था धिया नरा ॥६॥ मित्रं हुवे पूतऽदक्षं वरुणं च रिशादसं धियं घृताचीं साधंता ॥७॥ ऋतेन मित्रावरुणौ ऋतऽवृधौ ऋतऽस्पृशा क्रतुं बृहंतं आशाथे ॥८॥ कवी नः मित्रावरुणा तुविऽजातौ उरुऽक्षया दक्षं दधाते अपसं ॥९॥४॥

॥३॥ अश्विना यज्वरीः इषः द्रवत्ऽपाणी॰ शुभः पती पुरुऽभुजा चनस्यतं ॥१॥ अश्विना पुरुऽदंससा नरा शवीरया धिया धिष्ण्या वनतं गिरः ॥२॥ दस्रा युवाकवः सुताः नासत्या वृक्तऽबर्हिषः आ यातं रुद्रऽवर्तनी॰ ॥३॥ इंद्र आ याहि चित्रऽभानो॰ सुताः इमे त्वाऽयवः अण्वीभिः तना पूतासः ॥४॥ इंद्र आ याहि धिया इषितः विप्रऽजूतः सुतऽवतः उप ब्रह्माणि वाघतः ॥५॥ इंद्र आ याहि तूतुजानः उप ब्रह्माणि हरिऽवः सुते दधिष्व नः चनः ॥६॥५॥ ओमासः चर्षणिऽधृतः विश्वे देवासः आ गत दाश्वांसः दाशुषः सुतं ॥७॥ विश्वे देवासः अप्ऽतुरः सुतं आ गंत तूर्णयः उस्राःऽइव स्वसराणि ॥८॥ विश्वे देवासः अस्रिधः एहिऽमायासः अद्रुहः मेधं जुषंत वह्नयः ॥९॥ पावका नः सरस्वती वाजेभिः वाजिनीऽवती यज्ञं वष्टु धियाऽवसुः ॥१०॥ चोदयित्री सूनृतानां चेतंती सुऽमतीनां यज्ञं दधे सरस्वती ॥११॥ महः अर्णः सरस्वती प्र चेतयति केतुना धियः विश्वाः वि राजति ॥१२॥६॥१॥

॥४॥ सुरूपऽकृत्नुं ऊतये सुदुघाम्ऽइव गोऽदुहे जुहूमसि द्यविऽद्यवि ॥१॥ उप नः सवना आ गहि सोमस्य सोमऽपाः